तं बन्धुदुःखाय सबन्धुवित्त-
नाशादयो दोषगणा भजन्ते ॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समुग्रैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥" * ॥
अस्य परीक्षा यथा,—
"बालार्ककरसंस्पर्शात् यः शिखां लोहितां वमेत् ।
रञ्जयेदाश्रमं वापि स महागुण उच्यते ॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेद्यः समन्ततः ।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्व्वारिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः ।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिकारकः ॥
पञ्च सप्त नव विंशति रागः
क्षिप्त एव सकलः खलु वर्ण्णे ।
वर्ज्जयेद्द्रुमति वा करजाल-
मुत्तरोत्तरमहागुणिनस्ते ॥
नीलं रसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विशतप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥" * ॥
परिमाणम् ।
"गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाब्धिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः स्वरदिक्सुमाषक ।
तथा धात्रीफलत्रिंशद्विंशतिद्वादशमाषकः ॥
तथाम्रफलतुल्यो यो वह्निपक्षैकमाषकः ।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः ॥
बिम्बीफलसमाकारो वसुषड्दशतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात् ॥
केचिच्चाल्पतराः सन्ति जातीनां प्रतिरूपकाः ।
विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत् ॥
कलसपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुक्तमालीयाः ।
श्रीपर्णिकाश्च सदृशा विजातयः पद्मरागाणाम् ॥
तुषोपसर्गात् कलसाभिधान-
माताम्रभावादपि तुम्बुरुत्थम् ।
काष्ण्यात्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात् ।
श्रीपर्णकं दीप्तिनिराकृतित्वा-
द्विजातिलिङ्गाश्रय एष भेदः ॥"
तथा च ।
"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रमृष्टः प्रजहाति दीप्तिम् ।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्क्षेपपथानुवृत्तिं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां स्वजातिं
लक्षेद्गुरुत्वेन गुणेन विद्वान् ॥
अप्रणश्यति सन्देहे शिलायां परिघर्षयेत् ।
घृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ॥
स्वजातकं ससुत्थेन विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुच्यान्योन्यकेनचित् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वेऽपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थमेवं
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहावबद्धो
मणिस्तु धार्य्यो विगुणेन जात्वः ।
न कौस्तुभेनापि सहावबद्धं
विद्वान् विजातिं बिभृयात् कदाचित् ॥
चण्डाल एकोऽपि यथा द्विजातीन्
समेत्य भूरीनपहन्त्ययत्नात् ।
तथा मणीन् भूरिगुणोपपन्नान्
शक्नोति विद्रावयितुं विजातः ॥" * ॥
अथ मूल्यम् ।
बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन छायाभागं विनिर्द्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुत्थापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथाशुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यचतुर्थांशहीनं स्याद्वै सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं हीयते शूद्रजन्मनि ॥
पद्मरागः पणं यस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षत्रयधृतो मणिः ।
द्वाविंशतिं सहस्राणां तस्य मूल्यं विनिर्द्दिशेत् ॥
एकोनो नूयते यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्द्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाड़िमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्त्रियवैश्यान्त्याश्चतुर्धा ये प्रकीर्त्तिताः ॥
चतुर्व्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयक्षयम् ॥"
इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

**पद्मलाञ्छनः**, पुं, (पद्मवत् लाञ्छनं पद्माकारलक्षणं चिह्नमितिशेषः यस्य ।) ब्रह्मा । सूर्य्यः । कुवेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति शब्दचिन्तामणिः ॥ )

**पद्मलाञ्छना**, स्त्री, ( पद्मं लाञ्छनं यस्याः । ) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

**पद्मवर्णकं**, क्ली, ( पद्मस्येव वर्णोऽस्य । कप् । पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्ण-युक्ते त्रि ॥

**पद्मवासा**, स्त्री, ( पद्मे वासो यस्याः । ) लक्ष्मीः ) इति हेमचन्द्रः ॥

**पद्मवीजं**, क्लीं, ( पद्मस्य वीजम् । ) कमलवीजम् । तत्पर्य्यायः । पद्माक्षम् २ गालोद्यम् ३ कन्दली ४ भेण्डा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ श्यामा ८ पद्मपर्कटी ९ । अस्य गुणाः । कटुत्वम् । स्वादुत्वम् । पित्तच्छर्द्दिदाहास्रशोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
"पद्मवीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥"
इति भावप्रकाशः ॥
(पद्मवीजमालाजपेनाशु साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा,—
"भक्त्या यो जपते नित्यं पद्मवीजैः सुदेशिकः ।
अचिराल्लभते सिद्धिं सत्यं सत्यं न संशयः ॥"

**पद्मवीजाभं**, क्ली, ( पद्मवीजस्य आभा इव आभा यस्य । पद्मवीजवत् आभातीति वा । आ+भा+कः । ) मखान्नम् । इति राजनिर्घण्टः । माखाना इति भाषा ॥